# shrItripurasundarI chakrarAjastotram

# શ્રીત્રિપુરસુન્દરીચક્રરાજસ્તોત્રમ્

## Document Information

Text title : ShrI Tripurasundari chakrarAjastotram

File name : tripurasundarIchakrarAjastotram.itx

Category : devii, dashamahAvidyA, stotra, devI, panchadashI

Location : doc_devii

Transliterated by : Pankaj Dubey dr.pankaj.dubey at gmail.com

Proofread by : Pankaj Dubey dr.pankaj.dubey at gmail.com

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2022

*sanskritdocuments.org*

shrItripurasundarI chakrarAjastotram

# શ્રીત્રિપુરસુન્દરીચક્રરાજસ્તોત્રમ્

શ્રીત્રિપુરસુન્દરી મૂલમન્ત્રાત્મકઃ ચક્રરાજસ્તવઃ
શ્રીગણેશાય નમઃ ।
ૐ ક એ ઈ લ હ્રીં હ સ ક હ લ હ્રીં સ ક લ હ્રીં શ્રીં ।

॥ ક॥

કર્તું દેવિ ! જગદ્-વિલાસ-વિધિના સૃષ્ટેન તે માયયા
સર્વાનન્દ-મયેન મધ્ય-વિલસચ્છ્રી-વિનદુનાઽલઙ્કૃતમ્ ।
શ્રીમદ્-સદ્-ગુરુ-પૂજ્ય-પાદ-કરુણા-સંવેદ્ય-તત્ત્વાત્મકં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૧॥

॥ એ॥

એકસ્મિન્નણિમાદિભિર્વિલસિતં ભૂમી-ગૃહે સિદ્ધિભિઃ
વાહ્યાદ્યાભિરુપાશ્રિતં ચ દશભિર્મુદ્રાભિરુદ્ભાસિતમ્ ।
ચક્રેશ્યા પ્રકતેઽયયા ત્રિપુરયા ત્રૈલોક્ય-સમ્મોહનં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૨॥

॥ ઈ॥

ઈડ્યાભિર્નવ-વિદ્રુમ-ચ્છવિ-સમાભિખ્યાભિરઙ્ગી-કૃતં
કામાકર્ષિણી કાદિભિઃ સ્વર-દલે ગુપ્તાભિધાભિઃ સદા ।
સર્વાશા-પરિ-પૂરકે પરિ-લસદ્-દેવ્યા પુરેશ્યા યુતં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૩॥

॥ લ॥

લબ્ધ-પ્રોજ્જ્વલ-યૌવનાભિરભિતોઽનઙ્ગ-પ્રસૂનાદિભિઃ
સેવ્યં ગુપ્ત-તરાભિરષ્ટ-કમલે સઙ્ક્ષોભકાખ્યે સદા ।
ચક્રેશ્યા પુર-સુન્દરીતિ જગતિ પ્રખ્યાતયાસઙ્ગતં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૪॥

॥ હ્રીં ॥

હ્રીઙ્કારાઙ્કિત-મન્ત્ર-રાજ-નિલયં શ્રીસર્વ-સઙ્ક્ષોભિણી
મુખ્યાભિશ્ચલ-કુન્તલાભિરુષિતં મન્વસ્ર-ચક્રે શુભે ।
યત્ર શ્રી-પુર-વાસિની વિજયતે શ્રી-સર્વ-સૌભાગ્યદે
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્  ॥ ૫ ॥

॥ હ ॥

હસ્તે પાશ-ગદાદિ-શસ્ત્ર-નિચયં દીપ્તં વહન્તીભિઃ
ઉત્તીર્ણાખ્યાભિરુપાસ્ય પાતિ શુભદે સર્વાર્થ-સિદ્ધિ-પ્રદે ।
ચક્રે બાહ્ય-દશારકે વિલસિતં દેવ્યા પૂર-શ્ર્યાખ્યયા
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૬ ॥

॥ સ ॥

સર્વજ્ઞાદિભિરિનદુ-કાન્તિ-ધવલા કાલાભિરારક્ષિતે
ચક્રેઽન્તર્દશ-કોણકેઽતિ-વિમલે નામ્ના ચ રક્ષા-કરે ।
યત્ર શ્રીત્રિપુર-માલિની વિજયતે નિત્યં નિગર્ભા સ્તુતા
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્  ॥ ૭ ॥

॥ ક ॥

કર્તું મૂકમનર્ગલ-સ્રવદિત-દ્રાક્ષાદિ-વાગ્-વૈભવં
દક્ષાભિર્વશિની-મુખાભિરભિતો વાગ્-દેવતાભિર્યુતામ્ ।
અષ્ટારે પુર-સિદ્ધયા વિલસિતં રોગ-પ્રણાશે શુભે
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૮ ॥

॥ હ ॥

હન્તું દાનવ-સઙ્ઘમાહવ ભુવિ સ્વેચ્છા સમાકલ્પિતૈઃ
શસ્ત્રૈરસ્ત્ર-ચયૈશ્ચ ચાપ-નિવહૈરત્યુગ્ર-તેજો-ભરૈઃ ।
આર્ત-ત્રાણ-પરાયણૈરરિ-કુલ-પ્રધ્વંસિભિઃ સંવૃતં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૯ ॥

॥ લ ॥

લક્ષ્મી-વાગ-ગજાદિભિઃ કર-લસત્-પાશાસિ-ઘણ્ટાદિભિઃ
કામેશ્યાદિભિરાવૃતં શુભ એકરં શ્રી-સર્વ-સિદ્ધિ-પ્રદમ્ ।

ચક્રેશી ચ પુરામ્બિકા વિજયતે યત્ર ત્રિકોણે મુદા
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્  ॥ ૧૦॥

॥ હ્રીં ॥

હ્રીઙ્કારં પરમં જપદ્ભિરનિશં મિત્રેશ-નાથાદિભિઃ
દિવ્યૌઘૈર્મનુજૌઘ-સિદ્ધ-નિવહૈઃ સારૂપ્ય-મુક્તિં ગતૈઃ ।
નાના-મન્ત્ર-રહસ્ય-વિદ્ભિરખિલૈરન્વાસિતં યોગિભિઃ
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૧૧॥

॥ સ ॥

સર્વોત્કૃષ્ટ-વપુર્ધરાભિરભિતો દેવી સમાભિર્જગત્
સંરક્ષાર્થમુપાગતાઽભિરસકૃન્નિત્યાભિધાભિર્મુદા ।
કામેશ્યાદિભિરાજ્ઞયૈવ લલિતા-દેવ્યાઃ સમુદ્ભાસિતં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્  ॥ ૧૨॥

॥ ક ॥

કર્તું શ્રીલલિતાઙ્ગ-રક્ષણ-વિધિં લાવણ્ય-પૂર્ણાં તનૂં
આસ્થાયાસ્ત્ર-વરોલ્લસત્-કર-પયોજાતાભિરધ્યાસિતમ્ ।
દેવીભિર્હૃદયાદિભિશ્ચ પરિતો વિન્દું સદાઽઽનન્દદં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્  ॥ ૧૩॥

॥ લ ॥

લક્ષ્મીશાદિ-પદૈર્યુતેન મહતા મઞ્ચેન સંશોભિતં
ષટ્-ત્રિંશદ્ભિરનર્ઘ-રત્ન-ખચિતૈઃ સોપાનકૈર્ભૂષિતમ્ ।
ચિન્તા-રત્ન-વિનિર્મિતેન મહતા સિંહાસનેનોજ્જ્વલં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૧૪॥

॥ હ્રીં ॥

હ્રીઙ્કારૈક-મહા-મનું પ્રજપતા કામેશ્વરેણોષિતં
તસ્યાઙ્કે ચ નિષણ્ણયા ત્રિ-જગતાં માત્રા ચિદાકિરયા ।
કામેશ્યા કરુણા-રસૈક-નિધિના કલ્યાણ-દાત્ર્યા યુતં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૧૫॥

॥ શ્રીં ॥

શ્રીમત્-પઞ્ચ-દશાક્ષરૈક-નિલયં શ્રીષોડશી-મન્દિરં
શ્રીનાથાદિભિરર્ચિતં ચ બહુધા દેવૈઃ સમારાધિતમ્ ।
શ્રીકામેશ-રહસ્સખી-નિલયનં શ્રીમદ્-ગુહારાધિતં
શ્રી-ચક્રં શરણં વ્રજામિ સતતં સર્વેષ્ટ-સિદ્ધિ-પ્રદમ્ ॥ ૧૬॥

Encoded and proofread by Pankaj Dubey dr.pankaj.dubey at gmail.com

*shrItripurasundarI chakrarAjastotram*

pdf was typeset on December 27, 2022

Please send corrections to *sanskrit@cheerful.com*